# .. Vedamantramanjari 3 ..

# ॥ वेदमन्त्रमञ्जरि - ३ ॥

Document Information

Text title : veda mantra manjari - 3

File name : vedamantramanjari3.itx

Category : sUkta

Location : doc_veda

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Rekha Venkatesh

Proofread by : Rekha Venkatesh

Description-comments : Converted from BRH version

Latest update : December 29, 2014

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 12, 2016

*sanskritdocuments.org*

# ॥ श्रीगणेशसूक्तम् ॥

## ऋग्वेदसंहिता मण्डल-८, अष्टक-६, सूक्त-८१

ॐ आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभं सं गृभाय । महाहस्ती दक्षिणेन ॥ १ ॥ विद्मा हि त्वा तुविकूर्मिन्तुविदेष्णं तुवीमघम् । तुविमात्रमवोभिः ॥ २ ॥ न हि त्वा शूर देवा न मर्तासो दित्सन्तम् । भीमं न गां वारयन्ते ॥ ३ ॥ एतोन्विन्द्रं स्तवामेशानं वस्वः स्वराजम् । न राधसा मर्धिषन्नः ॥ ४ ॥ प्र स्तोषदुप गासिषच्छ्रवत्साम गीयमानम् । अभिराधसाजुगुरत् ॥ ५ ॥ आ नो भर दक्षिणेनाभि सव्येन प्र मृश । इन्द्र मानो वसोर्निर्भाक् ॥ ६ ॥ उपक्रमस्वा भर धृषता धृष्णो जनानाम् । अदाशूष्टरस्य वेदः ॥ ७ ॥ इन्द्र य उ नु ते अस्ति वाजो विप्रेभिः सनित्वः । अस्माभिः सुतं सनुहि ॥ ८ ॥ सद्योजुवस्ते वाजा अस्मभ्यम् विश्वश्चन्द्राः । वशैश्च मक्षू जरन्ते ॥ ९ ॥ गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीद सादनम् ॥ १० ॥ नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत्क्रियते किं चनारे महामर्कं मघवञ्चित्रमर्च ॥ ११ ॥ अभिख्यानो मघवन्नाधमानान्त्सखे बोधि वसुपते सखीनाम् । रणं कृधि रणकृत्सत्यशुष्माभक्ते चिदा भजा राये अस्मान् ॥ १२ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

# ॥ ऐकमत्य सूक्तम् ॥

ऋषिः संवननः आङ्गिरसः छन्दः अनुष्टुप् १,२,४ त्रिष्टुप् ३ देवता अग्निः १, सञ्ज्ञानम् २-४

ॐ संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ । इळस्पदे समिध्यसे स नो वसून्या भर ॥ १ ॥ सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् । देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥ २ ॥ समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् । समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥ ३ ॥ समानी व आकूतिः समाना हृदयानि वः । समानमस्तु वो मनो यथा वः सुसहासति ॥ ४ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ श्रद्धा सूक्तम् ॥

ऋषिः श्रद्धा कामायनी छन्दः अनुष्टुप् देवता श्रद्धा देवी

ॐ श्रद्धयाग्निस्समिध्यते । श्रद्धया विन्दते हविः । श्रद्धां भगस्य मूर्धनि । वचसा वेदयामसि । प्रियग्ग् श्रद्धे ददतः । प्रियग्ग् श्रद्धे दिदासतः । प्रियं भोजेषु यज्वसु । इदं म उदितं कृधि । यथा देवा असुरेषु । श्रद्धामुग्रेषु चक्रिरे । एवं भोजेषु यज्वसु । अस्माकमुदितं कृधि । श्रद्धां देवा यजमानाः । वायुगोपा उपासते । श्रद्धाग्ं हृदय्ययाऽकूत्या । श्रद्धया हूयते हविः । श्रद्धां प्रातर्हवामहे । श्रद्धां मध्यन्दिनं परि । श्रद्धाग्ं सूर्यस्य निम्रुचि । श्रद्धे श्रद्धापये हमा । श्रद्धा देवानधिवस्ते । श्रद्धा विश्वमिदं जगत् । श्रद्धां कामस्य मातरम् । हविषा वर्धयामसि ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ स्वस्तिनोमिमीतां सूक्तम् ॥

ऋग्वेद संहिताः मण्डल-५, अष्टक-४, सूक्त-५१ ऋषिः स्वस्त्यात्रेय छन्दः त्रिष्टुप् १,२,३ अनुष्टुप् ४,५ देवता विश्वेदेवताः

ॐ स्वस्ति नो मिमीतामश्विना भगः स्वस्ति देव्यदितिरनर्वणः । स्वस्ति पूषा असुरो दधातु नः स्वस्ति द्यावापृथिवी सुचेतुना ॥ १ ॥ स्वस्तये वायुमुप ब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः । बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ २ ॥ विश्वे देवा नो अद्या स्वस्तये वैश्वानरो वसुरग्निः स्वस्तये । देवा अवन्त्वृभवः स्वस्तये स्वस्ति नो रुद्रः पात्वंहसः ॥ ३ ॥ स्वस्ति मित्रावरुणा स्वस्ति पथ्ये रेवति । स्वस्ति न इन्द्रश्चाग्निश्च स्वस्ति नो अदिते कृधि ॥ ४ ॥ स्वस्ति पन्थामनु चरेम सूर्याचन्द्रमसाविव । पुनर्ददताघ्नता जानता सङ्गमेमहि ॥ ५ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ वैदिक राष्ट्रगीता ॥

ॐ आब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायतामास्मिन्राष्ट्रे राजन्य इषव्यः शूरो महारथो जायातां दोग्ध्री धेनुर्वोढाऽनड्वानाशुः सप्तिः पुरन्धिर्योषा जिष्णू रथेष्ठाः सभेयो युवाऽस्य यजमानस्य वीरो जायतां निकामे निकामे नः पर्जन्यो वर्षतु फलिन्यो न ओषधयः पच्यन्तां योगक्षेमो नः कल्पताम् ॥ तैत्तिरीय संहिता ७।५।१८ ॥

॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ चतुर् वेदमन्त्राणि ॥

ॐ अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥
इषे त्वोर्जेत्वा वायवस्थो पायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मण आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा अयख्ष्मामावस्तेन ईशत माऽघशग्ं सो रुद्रस्य हेतिः परिवो वृणक्तु ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि ॥
अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि ॥
शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥

## ॥ वाक्सूक्तम् ॥

ॐ देवीं वाचमजनयन्त देवाः । तां विश्वरूपाः पशवो वदन्ति । सा नो मन्द्रेषमूर्जं दुहाना । धेनुर्वागस्मानुपसुष्टुतैतु । यद्वाग्वदन्त्यविचेतनानि । राष्ट्रीदेवानां निषसादमन्द्रा । चतस्र ऊर्जं दुदुहे पयाग्ंसी । क्वस्विदस्याः परमं जगाम । अनन्तामन्तादधि निर्मितां महीम् । यस्यां देवा अदधुर्भोजनानि । एकाख्षरां द्विपदाग्ं षट्पदां च । वाचं देवा उपजीवन्ति विश्वे । वाचं देवा उपजीवन्ति विश्वे । वाचं गन्धर्वाः पशवो मनुष्याः । वाची मा विश्वा भुवनान्यर्पिता । सा नो हवं जुषतामिन्द्रपत्नी । वागख्षरं प्रथमजा ऋतस्य । वेदानां माताऽमृतस्य नाभिः । सा नो जुषाणोप यज्ञमागात् । अवन्ती देवी सुहवा मे अस्तु । या मृषयो मन्त्रकृतो मनीषिणः । अन्वैच्छन्देवास्तपसा श्रमेण । तां देवीं वाचग्ं हविषा यजामहे । सा नो दधातु सुकृतस्य लोके । चत्वारिवाक्परिमिता पदानि । तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति । तुरीयं वाचो मनुष्या वदन्ति ॥
॥ ॐ शान्तिः शान्तिः शान्तिः ॥

Encoded and proofread by Rekha Venkatesh

.. Vedamantramanjari 3 ..

was typeset on August 12, 2016

Please send corrections to *sanskrit@cheerful.com*